# International Journal of Sanskrit Research

# अनन्ता


Printed Journal - Indexed Journal - Refereed Journal - Peer Reviewed Journal

ISSN: 2394-7519 - Impact Factor (RJIF): 5.12 - Index Copernicus

Volume 8 Issue 4 Jul - Aug 2022





Published By
Tirupati Journal Solutions
New Delhi, India

# International Journal of Sanskrit Research

ISSN: 2394-7519

Volume- 8 Issue-4 Jul - Aug 2022

**Published By**

**Tirupati Journal Solutions**

House No: 169, C-11, Sector-3, Rohini, New Delhi, India

Toll Free No: 18001234070

Tel: +91-9711224068

Year: **2022**, Volume: **8**, Issue: **4**
ISSN: 2394-7519
Impact Factor (RJIF): 5.12
Online Available at www.anantaajournal.com

**SANSKRIT JOURNAL**

# International Journal of Sanskrit Research

## Index for 2022 (Vol - 8, Issue - 4) Part - D

**01.** **अद्वैतवेदान्तस्याधुनिके समाजे उपयोगिता**
**Authored by:** सत्येश्वर जाना
**Page:** 229-232

**02.** श्रव्यकाव्यभेदाः
**Authored by:** Raja Vanamamalai
**Page:** 233-236

**03.** **Vedic sacrifice in Kālidāsa's Mayākāvyas**
**Authored by:** Bipasa Samanta
**Page:** 237-242

**04.** **संस्कृत साहित्य और रामकाव्य**
**Authored by:** नीतीश शर्मा
**Page:** 243-245

**05.** **अथर्ववेद में दाम्पत्य प्रेम**
**Authored by:** चिरञ्जीत सरकार
**Page:** 246-248

**06.** **Yoga: A system of Indian philosophy**
**Authored by:** Dr. Jyoti Kumari
**Page:** 249-252

**07.** **आनन्दत्व स्वरूप ब्रह्मतत्त्व के संदर्भ में**
**Authored by:** सुजीत कुमार
**Page:** 253-256

**08.** **चित्-त्व स्वरूप ब्रह्मतत्त्व के संदर्भ में**
**Authored by:** सुजीत कुमार
**Page:** 257-260

**09.** **अचिन्त्यभेदाभेद एवं अन्य वाद का तुलनात्मक अध्ययन**
**Authored by:** सुजीत कुमार
**Page:** 261-266

**10.** **औचित्यविचारचर्चायां वर्णितं क्षेमेन्द्राचार्यस्य पाण्डित्यम्**
**Authored by:** अनमोल शर्मा
**Page:** 267-269

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 267-269
© 2022 IJSR
www.anantaajournal.com
Received: 22-06-2022
Accepted: 29-07-2022

अनमोल शर्मा
सहायकाचार्यः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व
विद्यालयः, नई दिल्ली, भारत

Corresponding Author:
अनमोल शर्मा
सहायकाचार्यः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व
विद्यालयः, नई दिल्ली, भारत

# औचित्यविचारचर्चायां वर्णितं क्षेमेन्द्राचार्यस्य पाण्डित्यम्

**अनमोल शर्मा**

**सारांश**

औचित्यस्य साम्राज्यं सर्वत्र ईश्वरीयमानवीयव्यापारेषु नितरामस्ति। तत्र भगवतः सर्वावतारेषु प्रसङ्गानुगुणानां मोहिनीवामन नृसिंहादिरूपाणां ग्रहणं प्रमाणम् । मानवीयव्यापारेष्वपि प्रसङ्गानुगुणानां वक्तृत्वदातृत्वादिगुणगणानां वैशिष्ट्यात् मानवानां लौकिकसमुत्कर्षो दृश्यत एव । काव्येऽपि औचित्यस्य महती उपयोगिता तद्यथा औचित्यादेव रसव्यवहारः, अनौचित्यात् तु रसाभासः तथैव रसस्योत्कर्षहेतुत्वादेव गुणालङ्काररीत्यादीनांस्वस्वरूपावाप्तिः । क्षेमेन्द्राचार्येण औचित्यविचारचर्चायां सविस्तरं तदौचित्यस्य अन्वयव्यतिरेकनिदर्शनाभ्यांमीमांसा विहिता, तदेवात्र शोत्रपत्रे संक्षेपेण निरूप्यते।

**कूटशब्दः** औचित्यम्, आचार्यः, रसः, पाण्डित्यम्, गुणः, अलङ्कार, संघटना, प्रबन्धः, चित्तवृत्तिः, संप्रदायः, क्रिया, कारकम्, लिङ्गम्, उपसर्गः, निपातः, अन्वयः, व्यतिरेकः, स्थालिपुलाकन्यायः।

## प्रस्तावना

वक्तव्यस्य विषयोऽस्ति 'औचित्यविचारचर्चायां वर्णितं क्षेमेन्द्राचार्यस्य पाण्डित्यम्' वस्तुतो विषय एव एतादृशो यच्चिन्तनं विनैव बहवो विचारा अहमहम्पूर्विकया बुद्धौ परापतन्ति, ततश्च कुतः प्रारभ इत्यस्ति मे मनसि कौतुकं तथापि आब्राह्मभुवनाल्लोकव्याप्तम् औचित्यमेव आदाय तावत् कथ्यते। तत्र औचित्यम् एतादृग् वस्त्वस्ति यस्य सत्ता ईश्वरीयमानवीयव्यवहारेषु सर्वत्र नितरामस्ति,तदुक्तं स्वयं शिथिलीकृतग्रन्थग्रन्थिकेन अनन्तराजसभापण्डितेन परमसहृदयाभिनवगुप्तशिष्येन' औचित्यसिद्धान्तप्रतिष्ठापकेन क्षेमेन्द्राचार्येण –

> कृतारिवञ्चने दृष्टिर्येनाञ्जनमलीमसा ।
> अच्युताय नमस्तस्मै परमौचित्यकारिणे॥[2]

क्षेमेन्द्राचार्येणात्र ईश्वरव्यापारव्याप्तमौचित्यं विनिवेदितं यत् येन विष्णुना समुद्रमन्थनोपलब्धामृतवितरणकाले दृष्टिः कज्जलेन मलिना कृता तस्मै परमौचित्यकारिणे अर्थात् शत्रुवञ्चनोचितनारीवेषधारकाय अच्युताय कदाचिदपि औचित्यच्युतिरहिताय विष्णवे नमः।

ISSN : 2455-4219

# आलोचन दृष्टि

# Aalochan Drishti

An International Peer Reviewed Refereed Research Journal of Humanities

वर्ष : 07 अंक : 30 अक्टूबर - दिसम्बर, 2022

प्रधान-संपादक
डॉ० सुनील कुमार मानस

संपादक
डॉ० योगेश कुमार तिवारी

प्रबंध-संपादक
डॉ० सुधीर कुमार तिवारी

ISSN : 2455-4219

# आलोचन दृष्टि

# Aalochan Drishti

An International Peer Reviewed Refereed Research Journal of Humanities


| वर्ष - 07 | अंक - 30 | अक्टूबर-दिसम्बर, 2022 |
|---|---|---|
| Year - 07 | Volume - 30 | October-December, 2022 |



प्रधान-संपादक

डॉ. सुनील कुमार मानस

संपादक

डॉ. योगेश कुमार तिवारी

प्रबंध-संपादक

डॉ. सुधीर कुमार तिवारी



**मुद्रण :–** जय ग्राफिक्स एण्ड कान्सट्रक्सन,
आई0टी0आई0 रोड, फतेहपुर–212601।

© **प्रकाशक :**

**संपादकीय / प्रकाशकीय पता :–**

**सृजनश्री न्यास,**

आजाद नगर, बिन्दकी, जनपद–फतेहपुर,

उ0प्र0–212635

ई–मेल : aalochan.p@gmail.com


| | एक अंक | वार्षिक | आजीवन |
|---|---|---|---|
| **सदस्यता शुल्क** | | | |
| व्यक्तिगत | 300 | 1200 | 10,000 |
| संस्थागत | 400 | 1500 | 15,000 |

# विषयानुक्रमणिका


- संपादकीय

1. हिंदू (सनातन) धर्म में वर्ण और जाति-व्यवस्था 1-26
*कमलाकांत त्रिपाठी*

2. सर्वोदय की भारतीय चेतना और नारी 27-30
*आकांक्षा अग्निहोत्री*

3. स्वाधीनतापूर्व हिन्दी पत्रकारिता की विकास-यात्रा 31-34
*प्रो. सुधारानी सिंह*

4. भक्ति-साहित्य और सामाजिक-समरसता 35-41
*उमेश कुमार*

5. समकालीन हिंदी कविता और कुँवर नारायण 42-44
*डॉ. सुनील कुमार मिश्र*

6. भाववाद बनाम वस्तुवाद : एक सौंदर्य शास्त्रीय विवेचन 45-49
*योगेन्द्र कुमार मीना*

7. निर्गुण संत काव्य-परम्परा और दादू की कविताई 50-54
*मोहन कुमार*

8. अमृतराय के उपन्यासों में मानवीय-संवेदना 55-58
*आम्बरीन अरशद*

9. विभाजन केंद्रित प्रमुख हिंदी उपन्यास : विस्थापन की समस्याएँ 59-61
*फातिमा कनीज*

10. अंग्रेजी अनुदेशन माध्यम सम्बन्धी समस्या मापनी का निर्माण एवं प्रमापीकरण 62-68
*रुपाली गुप्ता एवं डॉ. छाया सोनी*

11. विशिष्ट शिक्षकों और दृष्टिबाधित एवं श्रवणबाधित विद्यार्थियों के मध्य... 69-73
*राम कुमार मानिक एवं डॉ. आर. एन. शर्मा*

12. अनुसूचित जनजातियों का सामाजिक-आर्थिक विकास (मध्यप्रदेष के झाबुआ... 74-78
*इडू सिंह निंगवाल एवं डॉ. देवेन्द्र मुझाल्दा*

13. **Women's Political Participation in India** 79-82
*Dr. Kiran Jha*

14. **Trend Analysis of Educational Researches Done From Year 2010...** 83-90
*Dr. Vandana Sharma & Dr. Harish Pandey*

15. चक्रपाणिविजयमहाकाव्यस्य अलङ्कृतिविमर्शः (प्रथमदशसर्गाः) 91-94
*डॉ. अनमोल शर्मा*

# चक्रपाणिविजयमहाकाव्यस्य अलङ्कृतिविमर्शः

## (प्रथमदशसर्गाः)

डॉ. अनमोल शर्मा*

ध्वननसद्भावादेव काव्यता न कुत्रापि वाक्यादौ साधुतया अवतरति, गुणालङ्कारादिभिर्विशिष्टस्य शब्दार्थयुगलस्य ध्वननसत्येव काव्यतावतरति पुष्टिञ्च समनुश्नते। धाराधीशस्य भोजराजस्य सभापण्डितेन भट्टलक्ष्मीधरेण पुराणप्रसिद्धं श्रीकृष्णबाणासुरयुद्धवृत्तमुपजीव्यत्वेन परिशील्य चक्रपाणिविजयमहाकाव्यमकारि। आचार्यराधावल्लभत्रिपाठीवर्येण अस्य महाकाव्यस्य वैशिष्ट्यवर्णने कथितं महाकाव्यमिदं स्वसाहित्यवैभवेन न बृहत्त्रयीमहाकाव्येभ्यः कथमपि न्यूनम्। तथा "अपृथग्यत्ननिर्वत्या" अलङ्कारा अस्य लेखनन्यग्रेऽहमहमिकया परापतन्ति।[1] विविधैः शब्दार्थालङ्कारैः सुसमृद्धमिदं महाकाव्यं तददिदानीं किञ्चिन्निरूप्यते। तत्र यमकालङ्कारो यथा–

***ईदग् दशा सम्प्रति मे खलायास्तादृक् च तस्याः श्लथमेखलायाः।***
***जातास्मि निष्पन्दमना दरेण विजृम्भते दैवमनादरेण।।***

अत्र पादान्तगो यमकः, उषानिमित्तं नायकमनिरुद्धमन्विष्यमाणायाः तत्सख्याः चित्रलेखाया भणितिरियं सम्प्रति मे (मम) खलायाः (अनिरुद्धानन्वेषणेन दुष्टायाः) ईदृग् दशा (शोचनीया) तथा तस्याः (उषायाः) श्लथा (शिथिला) मेखला (काञ्ची) यस्याः सा श्लथमेखला तस्या अपि तादृगवस्था। वियोगजन्यकृशाङ्गत्वात् सा श्लथमेखला अनिरुद्धमार्गणाभावात् अहं खला 'अतः' अत्र 'मे खलायाः' इत्यस्य पादान्तप्रयुक्तत्वात् पूर्वार्धे पादान्तयमकः। उत्तरार्धेऽपि 'दरेण' इत्यस्य पादान्तप्रयुक्तत्वात् पादान्तयमकः। तत्र प्रथमस्य दरेणेति पदस्य भयेन द्वितीयस्य दरेणेतिपदस्य अनादरेणेति पदांशेन सम्बन्धः। तथा– ***मनोजबाधा शमिता न तस्या मनोजवास्मीति वृथा प्रसिद्धिः।/ विनोदकं सा तमवीक्ष्य बाला विनोदकं शुष्यति पद्मिनीव।।***

अत्र पादादियमकः, पूर्वार्धे 'मनोजबाधा' इत्यस्य पादादौ प्रयुक्तत्वात्। स्वसखिकान्तमनिरुद्धमप्राप्य चित्रलेखा ब्रूते 'तस्याः (उषायाः) मनोजबाधा (कामपीडा) न शमिता तथा अहं चित्रलेखा मनोजवा (शीघ्रगामिनी) मनसा जवो गमनवेगो यस्याः सा 'मनोजवा' अस्मीति प्रसिद्धिर्व्यर्था। यमकादौ बवयोरभेदात् 'मनोजबाधा' तथा 'मनोजवा' अत्र पादादियमकः। उत्तरार्धेऽपि विनोदकमिति पदस्य पादादौ प्रयुक्तत्वात् पादादियमकः। चित्रलेखा वक्ति 'सा बाला (उषा) विनोदकं (आनन्दप्रदं) तं नायकं (अनिरुद्धं) अवीक्ष्य (अदृष्ट्वा) उदकं (जलं) विना पद्मिनीव (कमलिनीव) शुष्यति'। तथा– ***धीरेव मूढा विफलं भ्रमामि धीरेवमूढा तु न यद्वयस्या।/ महाशया मत्कृतयैव नूनं महाशया तिष्ठति सा नतभ्रूः।।***

अत्रापि पादादियमकः, चित्रलेखा अनिरुद्धमप्राप्य वदति धीरेव (बुद्धिरेव) मूढा (मोहिता) तादृशी अहं विफलं (व्यर्थं) पृथिव्यामत्र भ्रमामि तथा एवन्तु (व्यर्थभ्रमणेन नायकस्याप्राप्त्या) वयस्या (सखी) धीरा (गम्भीरा नायिका सा) ऊढा न भविष्यति, सा हि मत्कृतया (मत्प्रयुक्तया) महाशया (अत्यधिकविश्वासेन) महती चासौ आशा महत्याशा तया सा नतभ्रूः महाशया (आशान्विता) तिष्ठति महान् आशयः (अभिप्रायः) यस्या सा महाशया। तथैव– ***विभाव्य तदभावविदं भवानीं भवोऽपि शक्रं व्यसृजन् तदानीम्।/ स चामरैः सार्धमथ प्रतस्थे सचामरैरप्सरसां च संघैः।।***

अत्रापि पश्चिमार्धे 'स चामरैः' तथा 'सचामरै' इत्यत्र पादादौ प्रयुक्तत्वात् पादादियमकः। यद्यपि दुष्करयमकादीनां प्रयोगो ध्वनिकारादिभिर्निषिद्धस्तथापि रससमाहितचेतसः कवेः स्वयमेत अलङ्कारा अहमहमिकया परापतन्ति। अस्मिन् महाकाव्ये दुष्करयमकादीनां सरलतया रसानुगुण्येन प्रयोगो विहितः। अनुप्रासस्तु महाकावेः सर्वपद्येषु प्रविष्ट इव, अतः कियदत्र लिखामः, तथापि प्रकृतशोधपत्रानुरोधेन किञ्चित् प्रस्तूयते– ***भग्नेषु सैन्येषु महाभटानां ये वैरिवीरोन्मुखपादपाताः।/ तानुत्तमाङ्गेन दधाति धात्री तैरेव यस्माद् ध्रियते धरित्री।।***

---

* सहायकाचार्यः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत विश्वविद्यालयः, नई दिल्ली।

Website : aisanskritsahityasammelan.com
E-mail : sanskritratnakar01@gmail.com

ISSN 2395-3055

अप्रैल, 2024 ₹ 25

विशेषज्ञ समिति द्वारा समीक्षित संस्कृत की एक श्रेष्ठ मासिक शोधपत्रिका

# संस्कृत-रत्नाकरः

## Sanskrit Ratnakar

(A peer reviewed monthly Sanskrit Research Journal)



अखिल भारतीय संस्कृत साहित्य सम्मेलन (रजि०)
संस्कृत भवन, ए-10, कुतुब सांस्थानिक क्षेत्र, अरुणा आसफ अली मार्ग,
नई दिल्ली - 110067

वर्ष : 10 अंक : 11 ( 119 )

● विशेषज्ञ समिति द्वारा समीक्षित संस्कृत की एक श्रेष्ठ मासिक शोधपत्रिका

# संस्कृत-रत्नाकरः

**Sanskrit Ratnakar**

(A peer reviewed monthly Sanskrit Research Journal)

| | | |
|---|---|---|
| **स्वामित्व** | : | **अखिल भारतीय संस्कृत साहित्य सम्मेलन (रजि.)** |
| **अध्यक्ष** | : | **प्रो. रमेश कुमार पाण्डेय**<br>**अखिल भारतीय संस्कृत साहित्य सम्मेलन** |
| **प्रधान सम्पादक (पदेन)** | : | **रमाकान्त गोस्वामी** |
| **सम्पादक** | : | **प्रो. शिवशङ्कर मिश्र** |
| **सह-सम्पादक** | : | **डॉ. विजय गुप्ता** |
| **शोधपत्रपरीक्षक मण्डल** | : | **प्रो. केदार प्रसाद परोहा (नई दिल्ली)**<br>**प्रो. रमाकान्त पाण्डेय (जयपुर)**<br>**प्रो. रामसलाही द्विवेदी (नई दिल्ली)**<br>**प्रो. रामनारायण द्विवेदी (काशी)**<br>**प्रो. विनय कुमार पाण्डेय (काशी)** |
| **व्यवस्थापक मण्डल** | : | **आर. एन. वत्स 'एड्वोकेट'** |
| **ग्राफिक डिजाईनर** | : | **विश्वकर्मा शर्मा** |
| **संपादकीय कार्यालय** | : | **संस्कृत भवन, ए-10, अरुणा आसफ अली मार्ग, कुतुब सांस्थानिक क्षेत्र, नई दिल्ली-67** |
| **संपादक, प्रकाशक एवं मुद्रक** | : | **रमाकान्त गोस्वामी, महासचिव, अ.भा.सं. सा.स.** |
| **दूरभाष** | : | **011-41552221, मो.- 9818475418** |

*Website : aisanskritsahityasammelan.com*

*E-mail : sanskritratnakar01@gmail.com*

**नियम एवं निर्देश :-**

- **संस्कृत-रत्नाकरः में प्रकाशित लेख लेखकों के अपने व्यक्तिगत विचार हैं। इसके लिए "संस्कृत-रत्नाकरः" जिम्मेदार नहीं है।**
- ***प्रकाशितशोधसामग्री लेखकस्यास्ति अतः लेखस्य मौलिकतादिविषये सम्पूर्णं दायित्वं लेखकस्य भविष्यति न तु सम्पादकस्य न वा प्रकाशकस्य।***



## सम्पादकीयम्

भाषया भाषिणां परिचयः सम्प्राप्यते। जनानां संस्कृतिः, जनानां जीवनम्, जनानामाचरणम्, जनानां व्यवहारश्च भाषयैव व्याख्यायते। समेषां राष्ट्राणां काचिद् राष्ट्रभाषा भवति यस्यां राष्ट्रस्य गौरवं, वैभवं, सौष्ठवं च समुदेति। वस्तुतः राष्ट्रस्य शासनदृष्ट्या राष्ट्रभाषा सा एव भाषा भवितुमर्हति या सम्पूर्णे राष्ट्रे व्याप्ता स्यात् अर्थात् राष्ट्रस्य प्रतिकोणं सकलेषु प्रान्तेषु च प्रचलिता परिचिता वा भवेत्। या हि भाषा राष्ट्रभाषापदमलङ्कृता सती सर्वजनैः पक्षपातविरहितेति अनुभूता भवेत्। यस्यां राष्ट्रभाषायां सत्यां राष्ट्रस्य सकलप्रान्तीयाः जनाः एवम्प्रमुदितमनसा अनुभवेयुर्यत् इयम्भाषा अस्मत्प्रान्तीयभाषाजननीत्वेन अस्मत्सहयोगिनी विद्यते।

यस्यां भाषायां जनोपयोगिप्रचुरं साहित्यम्, देशोपयोगिविपुलं साधनम्, रुचीनां वैचित्र्यात् ऋजुकुटिलनानापथजुषामित्युनक्त्यनुसारेण-राष्ट्रस्य विभिन्नवर्गाणां कृते प्रकामं विविधजीविकाप्रधानसाहित्यं च समुपलब्धं भवेत्। यस्यां भाषायाम्-देशसमृद्धये राष्ट्रसुरक्षायै च प्रचुरम् अन्वेषणीयम् विज्ञानविपुलम् साहित्यम् दृष्टिगोचरं भवेत्। संक्षेपतः यस्यां भाषायां देशस्य निखिलजनानां सर्वविधलौकिकाभ्युदयाय- दण्डविद्या, वार्ता विद्या, भूगोल-खगोल-गणित-चिकित्सा-चित्रकला-मूर्तिकलाप्रभृतिविविध-विद्यानां प्रतिपादनं भवेत्, अथ च पारलौकिकनिःश्रेयसाय नानाविधानि दर्शनसाहित्यानि विपुलमात्रायां जननयनपथगोचराणि स्युः सा एव भाषा राष्ट्रभाषापदमारोहितुं विराजितुं चालम्।

अस्याममरभाषायां वैदिककालस्य प्रत्यक्षफलप्रदा कर्ममीमांसा, उपनिषत्कालस्य ईशावास्यमिदं सर्वं, सर्वं खल्विदं ब्रह्म इति ब्रह्मविषयिणी विवेचना, आरण्यकयुगीना तपःसाधना, रामायणकालिकी नित्यं प्रमुदिताः सर्वे रामे राज्यं प्रशासति इत्यात्मिका प्रजास्वातन्त्र्यधारिणी रामराज्यवर्णना, महाभारतकालिकी शस्त्रास्त्रशक्तिः, गुप्तकालस्य स्वर्णयुगम्, अशोक-कालस्य शान्तिः, विक्रमकालस्य नीतिः, मुस्लिमकालस्य भीतिः एवं व्यास-वाल्मीकि- कालिदास-भासप्रभृतीनां कवीन्द्राणाम् काव्यकालिका, गर्ग-गौतम-कपिल-पतञ्जालि-जैमिनिप्रभृतीनाम्-दर्शनलतिका, भास्कराचार्यप्रभृतिभिः विकासिता गणितसम्वन्धिनी खगोलगतिका, कौटिल्यकामन्दकादीनां विस्थपिता राजशास्त्रार्थशास्त्रसम्वन्धिनी सुमतिश्च निगूहिता विद्यते। अतः इयमेव भारतस्य गौरवध्वजसंवाहिका भारतीयैः समादृता भाषा विराजते। अतीतस्य गौरवम्, उत्थानं, पतनम्, ह्रासः विकासश्चैतत्सर्वमनयैव धारितम् अस्ति। अतः इयमेव भाषा नूनं भारतदेशस्य राष्ट्रभाषापदे सर्वथा विराजमानयोग्या एवं कथने नास्ति संशीतिलेश इति।

**प्रो. शिवशङ्करमिश्रः**, शोधविभागाध्यक्षः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

# विषय-सूची

**03 | 'विश्वपथप्रदर्शिका भारतीयज्ञानपरम्परा' विषयिणी अन्तर्राष्ट्रीया संगोष्ठी समायोजिता**

**05 | जयतु जानकीजानिः रामः -प्रो.वलवहादुरत्रिपाठी**

**06 | श्रीमतां नरेन्द्रदामोदरदासमोदीमहोदयानां वैज्ञानिकी-दृष्टिः विजयतेतराम्..-प्रो.वलवहादुरत्रिपाठी**

**07 | उत्तररामायणमहाकाव्यस्य कथावस्तुविमर्शः - डा. अनमोलशर्मा**

**13 | शुक्लयजुर्वेद में वर्णित सूर्य देवता का स्वरूप - आशुतोष भट्ट, श्री अंकित भट्ट**

**17 | अध्यास का लक्षण और भेद - सत्येश्वर जाना**

**20 | न्यायदर्शनाभिमतम् अप्रमास्वरूपम् -मिन्टु दे**

(कवर सहित पृष्ठ संख्या 24)

# उत्तररामायणमहाकाव्यस्य कथावस्तुविमर्शः



पूर्वाचार्यैः प्रतिष्ठितमतानां काव्यवस्तूनाञ्च सरसतया न[illegible]ानतया च प्रस्तुतीकरणं न दोषाय प्रत्युत श्रेयाय एवात्र कालिदासभवभूतिप्रभृतीनां काव्यजातं प्रमाणम्। भाविकवीनाङ्कृते समुपदिष्टं ध्वनिकृता विषयेऽस्मिन् यत् "परकविविषयग्रहणे विरतमनसां भगवती सरस्वती एव यथेष्टं वस्तु घटयति।"[1] अतिविचित्रकविपरम्परावाहिनि संसारे वाग्देव्याः भगवतः श्रीरामचन्द्रस्य च विलक्षणानुग्रहात् कविपुङ्गवे आचार्यलक्ष्मीकान्तशर्मणि चरमे वयसि चतुःसप्ततिवर्षे काव्यसिसृक्षा अजनि, तदुक्तं तेनैव कविपुङ्गवेन-

आषोडशात् त्र्यधिकसप्ततिवर्षमध्ये
वागर्थरम्यरचनां प्रति नो रुचिर्मे।
काले गते बहुतिथे सहसोपपन्न
उन्मेष एष रुचिरो रसभावमिश्रः॥[2]

स्वस्य सहसा काव्यकरणप्रवृत्तिं मालोपमया प्रस्तुवन् श्रीलक्ष्मीकान्तशर्मा ब्रवीति-

यथा तरङ्गाः सलिले समारुते
तडिद्यथा मेघवृते विहायसि।
उत्सोऽथवा शैलनिकायसन्धिषु
तथा सिसृक्षाऽजनि काव्यसंविधौ॥[3]

आचार्यलक्ष्मीकान्तशर्मणो जन्म 12/06/1940 इति दिनाङ्के छत्तीसगढराज्यस्य रायपुरनगरे विदुषां श्रीमतां गेहेऽभवत्। पितामहस्य पण्डितदेवदत्तशर्मणो ज्योतिषधर्मशास्त्रयोर्विशिष्टा व्युत्पत्तिरासीत् तथा पितुः पण्डितवासुदेवशर्मणः छत्तीसगढ-मध्यप्रदेश-उडीशा-राज्येषु ज्योतिषविषये ख्यातिरासीत्। अधुनापि तेषु राज्येषु देवपञ्चाङ्गस्य प्रतिवर्षं बाहुल्येन विक्रयणं भवति। पण्डितलक्ष्मीकान्तशर्मा एम.ए. संस्कृतम् (1963) तथा 'वैदिक एवं वैदिकेतर साहित्य के परिप्रेक्ष में इन्द्र' इति शीर्षकोपरि शोधकार्यमकरोत्। सः दुर्गमहाविद्यालये प्राध्यापकतया विभागाध्यक्षतया च स्वसेवामदात्। बहूनि शोधपत्राणि तेन विलिखितानि, छत्तीसगढ-सर्वकारेण षोडशोत्तरद्विसहस्रवर्षे (2016) संस्कृतभाषासम्मान इति सम्माननेन सभाजितश्च सः। भगवन्तं जानकीनाथं संस्मरन् बहुविधं कविकर्म कुर्वन्नस्ति। पञ्च कृतयस्तस्य सन्ति तद्यथा –

1. उत्तररामायणम् ( नवसर्गात्मकं महाकाव्यम्)
2. त्रिपथगा [क] श्रीरामस्य वनप्रवासः [ख] नारदव्यामोहः (खण्डकाव्यम्) [ग] स जयतु भगवान् राघवो बालरूपः